The bulk of this stotram was obtained from

http://sanskritdocuments.org/doc_devii/nilasarasvatistotra.pdf.

घोररूपे महारावे
सर्व शत्रु भयङ्करी ।
भक्तेभ्यो वरदे देवी
त्राहि मां शरणागतम् ॥१॥

ghorarūpe mahārāve
sarva śatru bhayaṅkarī |
bhaktebhyo varade devī
trāhi māṃ śaraṇāgatam ||1||

ॐ सुरासुरार्चिते देवी
सिद्ध गन्धर्व सेविते ।
जाड्य पापहरे देवी
त्राहि मां शरणागतम् ॥२॥

Om̃ surāsurārcite devī
siddha gandharva sevite |
jāḍya pāpahare devī
trāhi māṃ śaraṇāgatam ||2||

जटाजूट समायुक्ते
लोल जिह्वान्त कारिणी ।
द्रुत बुद्धिकरे देवी
त्राहि मां शरणागतम् ॥३॥

jaṭājūṭa samāyukte
lola jihvānta kāriṇī |
druta buddhikare devī
trāhi māṃ śaraṇāgatam ||3||

सौम्यक्रोधधरे रूपे
चण्डरूपे नमोस्तु ते ।
सृष्टिरूपे नमस्तुभ्यं
त्राहि मां शरणागतम् ॥४॥

saumyakrodhadhare rūpe
caṇḍarūpe namostu te |
sṛshṭirūpe namastubhyaṃ
trāhi māṃ śaraṇāgatam ||4||

जडानां जडतां हन्ति
भक्तानां भक्तवत्सला ।
मूढतां हर मे देवी
त्राहि मां शरणागतम् ॥५॥

jaḍānāṃ jaḍatāṃ hanti
bhaktānāṃ bhaktavatsalā |
mūḍhatāṃ hara me devī
trāhi māṃ śaraṇāgatam ||5||

| | |
|---|---|
| वं ह्रूं ह्रूङ्कार मये देवी | vaṃ hrūṃ hrūṅkāra maye devī |
| बलिहोमप्रिये नमः । | balihomapriye namaḥ \| |
| उग्रतारे नमो नित्यं | ugratāre namo nityaṃ |
| त्राहि मां शरणागतम् ॥६॥ | trāhi māṃ śaraṇāgatam \|\|6\|\| |
| बुद्धिं देहि यशो देहि | buddhiṃ dehi yaśo dehi |
| कवित्वं देहि देवी मे । | kavitvaṃ dehi devī me \| |
| मूढत्वं च हरेर्देवी | mūḍhatvaṃ ca harerdevī |
| त्राहि मां शरणागतम् ॥७॥ | trāhi māṃ śaraṇāgatam \|\|7\|\| |
| इन्द्रादि विलसद् वन्द | indrādi vilasad vanda |
| वन्दिते करुणामयी । | vandite karuṇāmayī \| |
| तारे तारधि नाथास्ये | tāre tāradhi nāthāsye |
| त्राहि मां शरणागतम् ॥८॥ | trāhi māṃ śaraṇāgatam \|\|8\|\| |

## ॥ अथ फलश्रुतिः ॥
## || atha phalaśrutiḥ ||

| | |
|---|---|
| अष्टम्यां च चतुर्दश्यां | ashṭamyāṃ ca caturdaśyāṃ |
| नवम्यां च पठेन्नरः । | navamyāṃ ca paṭhennaraḥ \| |
| षण्मासैः सिद्धिमाप्नोति | shaṇmāsaiḥ siddhimāpnoti |
| नात्र कार्या विचारणा ॥१॥ | nātra kāryā vicāraṇā \|\|1\|\| |
| मोक्षार्थी लभते मोक्षं | mokshārthī labhate mokshaṃ |
| धनार्थी लभते धनं । | dhanārthī labhate dhanaṃ \| |
| विद्यार्थी लभते विद्यां | vidyārthī labhate vidyāṃ |
| तर्कव्याकरणादिकाम् ॥२॥ | tarkavyākaraṇādikām \|\|2\|\| |

इदं स्तोत्रं पठेद्यस्तु
सततं श्रद्धयान्वितः ।
तस्य शत्रुः क्षयं याति
महाप्रज्ञा प्रजापते ॥३॥

**idaṃ stotraṃ paṭhedyastu**
**satataṃ śraddhayānvitaḥ |**
**tasya śatruḥ kshayaṃ yāti**
**mahāprajñā prajāpate ||3||**

पीडायां यापि सङ्ग्रामे
जाड्ये दाने तथा भये ।
य इदं पठति स्तोत्रं
शुभं तस्य न संशयः ।
इति प्रणम्य स्तुत्वा च
योनिमुद्रां प्रदर्शयेत् ॥

**pīḍāyāṃ yāpi saṅgrāme**
**jāḍye dāne tathā bhaye |**
**ya idaṃ paṭhati stotraṃ**
**śubhaṃ tasya na saṃśayaḥ |**
**iti praṇamya stutvā ca**
**yonimudrāṃ pradarśayet ||**

॥ इति श्री नील सरस्वति स्तोत्रम् सम्पूर्णम् ॥

**|| iti śrī nīla sarasvati stotram sampūrṇam ||**